
# चतुरः वानरः



एकस्मिन् नदीतीरे एकः जम्बूवृक्षः आसीत्। तस्मिन् एकः वानरः प्रतिवसति स्म। सः नित्यं तस्य फलानि खादति स्म। कश्चित् मकरोऽपि तस्यां नद्यामवसत्। वानरः प्रतिदिनं तस्मै जम्बूफलानि अयच्छत्। तेन प्रीतः मकरः तस्य वानरस्य मित्रमभवत्।

एकदा मकरः कानिचित् जम्बूफलानि पत्न्यै अपि दातुं आनयत्। तानि खादित्वा तस्य जाया अचिन्तयत् अहो! यः प्रतिदिनमीदृशानि फलानि खादति, नूनं तस्य हृदयमपि अतिमधुरं भविष्यति। सा पतिमकथयत्। भोःस्वामिन्! जम्बूभक्षकस्य तव मित्रस्य हृदयमपि जम्बूवत् मधुरं भविष्यति। अहं तदेव खादितुमिच्छामि। तस्य हृदयभक्षणाय मम बलवती स्पृहा। यदि मां जीवितां द्रष्टुम् इच्छसि तर्हि शीघ्रम् आनय तस्य वानरस्य हृदयम्। पत्न्याः हठात् विवशः मकरः नदीतीरं गत्वा वानरमवदत् – 'बन्धो! तव भ्रातृजाया त्वां द्रष्टुमिच्छति। अतः मम गृहमागच्छ।' वानरः अपृच्छत् – कुत्र ते गृहम् ? कथमहं तत्र गन्तुं शक्नोमि? 'मकरः अवदत् – अलं चिन्तया। अहं त्वां स्वपृष्ठे धृत्वा गृहं नेष्यामि।' तस्य वचनं श्रुत्वा विश्वस्तः वानरः तस्मात् वृक्षस्कन्धात् अवतीर्य मकरपृष्ठे उपाविशत्।



नदीजले वानरं विवशं मत्वा मकरः अकथयत्– मम पत्नी तव हृदयं खादितुमिच्छति। तस्मै तव हृदयं दातुमेव त्वां नयामि। चतुरः वानरः शीघ्रमकथयत्– अरे मूर्ख! कथं न पूर्वमेव निवेदितं त्वया ? मम हृदयं तु वृक्षस्य कोटरे एव निहितम्। अतः शीघ्रं तत्रैव नय अहं स्वहृदयमानीय भातृजायायै दत्त्वा तां तोषयामि इति।

मूर्खःमकरः तस्य गूढमाशयम् अबुद्ध्वा वानरं पुनस्तमेव वृक्षमनयत्। ततः वृक्षमारुह्य वानरः अवदत् धिङ् मूर्ख! अपि हृदयं शरीरात् पृथक् तिष्ठति ? अतः गच्छ सम्प्रति, त्वया सह मम मैत्री समाप्ता, सत्यमुक्तं केनचित् कविना–

**विश्वासो हि ययोर्मध्ये तयोर्मध्येऽस्ति सौहृदम्।**
**यस्मिन्नैवास्ति विश्वासः तस्मिन् मैत्री क्व सम्भवा।**

## शब्दार्थाः

दातुम् = देने के लिए । जाया = पत्नी । प्रतिदिनमीदृशानि = रोज ऐसे (इस प्रकार के) । नूनम् = निश्चित रुप से । जम्बूभक्षकस्य = जामुन खानेवाले का । स्पृहा = इच्छा, अभिलाषा । तर्हि = तो । आनय = ले आओ । विवशः = मजबूर । भ्रातृजाया = भाभी । अलम् = बस, और न करना, मना करना । स्वपृष्ठे = अपनी पीठ पर । धृत्वा = धारण करके, बिठा करके । नेष्यामि = ले जाऊँगा। विश्वस्तः = विश्वास करके । कोटरे = खोखर में । उपाविशत् = बैठ गया । दातुमेव (दातुम्+एव) = देने के लिए ही । निहितम् = रखा हुआ । परितोषयामि = संतुष्ट करुँगा/प्रसन्न करुँगा । गूढम् = छिपे हुए/गुप्त । अबुद्ध्वा = न जानकर । वृक्षमारुह्य = वृक्ष पर चढ़कर । ययोः = जिन दो के । तयोः = उन दो के । सौहृदम् = सुहृद्भाव/मित्रता । सम्भवा = हो सकता है । नद्यामवसत् (नद्याम्+अवसत्) = नदी में रहता था । पत्न्यै = पत्नी के लिए । वृक्षस्कन्धात् = पेड़ के तने से । तत्रैव (तत्र+एव) = वहीं । अनयत् = ले गया । अतः परम् = इसके बाद।

## अभ्यासप्रश्नाः

**(1) निम्न प्रश्नों के उत्तर संस्कृत में एक वाक्य में लिखिए—**

(क) जम्बूवृक्षः कुत्र आसीत् ?
(ख) वानरः प्रतिदिनं कस्मै जम्बूफलानि अयच्छत् ?
(ग) मकरः वानरं पुनः कुत्र अनयत् ?
(घ) मकरः कुत्र वसति स्म ?

**(2) निम्न प्रश्नों के उत्तर संस्कृत में लिखिए—**

(क) वानरः कुत्र प्रतिवसति स्म ?
(ख) वानरस्य केन सह मैत्री अभवत् ?
(ग) वानरः मकराय किम् अयच्छत् ?
(घ) मकरी किं खादितुम् इच्छति स्म ?
(ङ) विश्वस्तः वानरः किम् अकरोत् ?

**(3) निम्न शब्दों के नपुंसकलिङ्ग के द्विवचन एवं बहुवचन के रूप लिखिए —**

(क) पत्रम् .................. ...................
(ख) गृहम् .................. ...................
(ग) हृदयम् .................. ...................
(घ) शरीरम् .................. ...................
(ङ) फलम् .................. ...................

**(4) कोष्टक में दिये गए शब्दों से रिक्त स्थानों की पूर्ति कीजिए—**

(दातुम्, सह, अलम्, अगच्छत्, द्रष्टुम् त्वां)

(क) वानरः मकरेण ..................... गच्छति।
(ख) बालकः विद्यालयम् .....................।
(ग) तव हृदयं ................. एव ............... नयामि।
(घ) ..................... कोलाहलेन।
(ङ) अहं तव छाया चित्रम् .........................इच्छामि।

QDCGRT